National Journal of
Hindi & Sanskrit Research

**ISSN: 2454-9177**
NJHSR 2025; 1(63): 198-201
© 2025 NJHSR
www.sanskritarticle.com

**श्रीमती मञ्जुलतासाहुः**
शोधच्छात्रा, अद्वैतवेदान्तविभागः,
श्रीजगन्नाथसंस्कृतविश्वविद्यालयः,
पुरी

**Correspondence:**
**श्रीमती मञ्जुलतासाहुः**
शोधच्छात्रा, अद्वैतवेदान्तविभागः,
श्रीजगन्नाथसंस्कृतविश्वविद्यालयः,
पुरी

# उपनिषद्ब्रह्मेन्द्रयोगी : जीवनसाधना तथा वेदान्तदर्शनम्

**श्रीमती मञ्जुलतासाहुः**

**सारांश -**

भारतीयज्ञानपरम्परायां योगिनः, वेदान्तिनः, महात्मानः च आत्मविद्याया प्रचारकाः अभवन्। तेषु उपनिषद्ब्रह्मेन्द्रयोगी अष्टादशशताब्द्यां प्रादुर्भूतः अद्वैतवेदान्तपरम्परायाः विशिष्टः आचार्यः आसीत्। तस्य जीवनं योगसाधना, तपः, ध्यानं तथा उपनिषदध्ययनस्य समन्वितरूपमासीत्। सः केवलं शास्त्रकारः न, अपि तु अनुभवनिष्ठः साधकः आसीत्। अस्मिन् शोधप्रबन्धे तस्य जीवनचर्या, गुरुपरम्परा, साधनापद्धतिः, तत्त्वचिन्तनम्, कृतयः तथा भारतीयज्ञानपरम्परायां योगदानञ्चेति विषयाः विचार्यन्ते।

**कूटशब्दाः** - उपनिषद्ब्रह्मेन्द्रयोगी, अद्वैतवेदान्तः, योगसाधना, आत्मज्ञानम्, गुरुपरम्परा।

**भूमिका -**

भारतीयज्ञानपरम्परायां बहवः महात्मानः प्रादुर्भूताः, ये आत्मविद्यायाः रहस्यं जगति प्रकाशयन्तः मानवजीवनस्य नूतनमार्गं निर्दिशन्ति। तेषु अन्यतमः उपनिषद्ब्रह्मेन्द्रयोगी इति सुप्रसिद्धः आसीत्। तस्य नाम एव तस्य साधनायाः सारं वदति। उपनिषदां तत्त्वं यस्य अन्तःकरणे साक्षात् प्रतिफलितं, स एव "उपनिषद्ब्रह्मेन्द्र" इति कथ्यते। अस्य जीवनं न केवलं तपसः, योगस्य, ज्ञानस्य च समन्वयमयं आसीत्, अपि तु उपनिषद्वाक्यानां व्यावहारिकजीवने प्रयोगरूपं उदाहरणम्। अष्टादशशतके तमिलनाडुदेशे सः अवतीर्णः, यदा भारतीयसमाजः धर्मदर्शनयोः पुनर्जागरणं प्राप्नोति स्म। तेन अद्वैतवेदान्तस्य तत्त्वानि पुनः प्रज्वाल्य लोकानां चित्तेषु प्रकाशितानि। सः ब्रह्मस्वरूपे स्थिरदृष्टिः, नित्ययोगनिष्ठः, गुरुभक्तिपरायणः च आसीत्। तस्य सम्पूर्णजीवनं वेदान्तस्य अद्वैतभावस्य मूर्तरूपं ददाति। "ब्रह्मैवाहं नापरः" इति वाक्यं केवलं तस्य ग्रन्थेषु न दृश्यते, अपि तु तस्य आचरणे अपि साक्षात्कृतम्। उपनिषद्ब्रह्मेन्द्रयोगिनः कार्यं केवलं आध्यात्मिकक्षेत्रे न, अपि तु साहित्यं, संगीतं, योगः, साधना, समाजसेवा इत्यादिषु अपि विस्तृतम्। तेन लिखिताः ग्रन्थाः "उपनिषद्ब्रह्मेन्द्रविलासः", "ब्रह्मतत्त्वप्रकाशिका", "योगसुधाकरः" इत्यादयः अद्यापि साधकानां मार्गदर्शकाः भवन्ति। तस्य रचनासु वेदान्तस्य गाम्भीर्यं, भक्तेः माधुर्यम्, योगस्य स्थैर्यम्, भाषायाः सरसता च सम्यगन्विता दृश्यते।

प्रबन्धोऽयं तस्य जीवनस्य, साधनायाः, तत्त्वज्ञानस्य, साहित्यसेवायाः च विस्तृतवर्णनं करोति। ग्रन्थेऽस्मिन् वयं केवलं तस्य चरित्रं न अध्ययनं कुर्मः, अपि तु तस्य आत्मबोधस्य प्रकाशं ज्ञातुम् प्रयत्नं कुर्मः। उपनिषद्ब्रह्मेन्द्रयोगिनः जीवनं अस्माकं कृते प्रेरणास्रोतः भवेत् इत्येव अस्य शोधप्रबन्धस्य प्रयोजनम्।

**जन्मस्थानवर्णनम् -**

उपनिषद्ब्रह्मेन्द्रयोगिनः जन्म अष्टादशशताब्द्यां तमिलनाडुदेशे अभवत्। तस्य जन्मभूमिः काञ्चीपुरप्रदेशः इति परम्परया निर्दिश्यते। सः ब्राह्मणकुले प्रतिष्ठिते, वेदाध्ययनपरम्परायां प्रवृत्ते च जातः। पितुः नाम महादेवनाथः, मातुः नाम ब्रह्मेश्वरी इति कतिपयग्रन्थेषु निर्दिष्टम्। बाल्यकालात् एव तस्य स्वभावः अत्यन्तं शान्तः, विनीतः, ज्ञानपिपसुः च आसीत्। बाल्ये एव सः वेदान्, उपनिषदः, धर्मशास्त्राणि च श्रवणमननाभ्यां अधीतवान्। गुरुकुले निवसन् सः आत्मज्ञानस्य विषये गाढं जिज्ञासुरासीत्। अन्यबालकाः यदा क्रीडायां रता आसन्, तदा सः निःशब्देन वेदमन्त्राणां जपेन मनः पवित्रं करोति स्म। तस्य ध्यानासक्तिः एव तस्य भावीयोगित्वस्य पूर्वसूचना आसीत्। किञ्च, तस्य गुरवः अपि तं अत्यन्तं प्रतिभावन्तं शिष्यं मन्यन्ते स्म। तेन अल्पकालेन व्याकरणं, मीमांसा, न्यायदर्शनं च अधीतानि। विशेषतः तस्य उपनिषदां रहस्यानि ज्ञातुं महती आसक्तिरासीत्। तस्य शङ्कराचार्यस्य भाष्याणि श्रुत्वा अद्वैततत्त्वे दृढश्रद्धा उत्पन्ना। यदा सः तरुणावस्थां प्रविष्टः, तदा तस्य मनसि आत्मसाक्षात्कारस्य तीव्रा आकाङ्क्षा जागरूका बभूव। तेन लौकिकजीवनं परित्यज्य संन्यासमार्गं स्वीकृतः। तस्मिन्नपि समये तस्य जीवनदिशा पूर्णतया परिवर्तिता। सः गुरुम् उपगत्य ब्रह्मविद्यायाः दीक्षां प्राप्य उपनिषदां सारं स्वानुभवेन अधिगतवान्।

**गुरुपरम्परा च शिक्षाग्रहणम् -**

उपनिषद्ब्रह्मेन्द्रयोगिनः बाल्ये एव गुरुभक्त्या प्रेरितः आसीत्। तस्य जीवने गुरुः केवलं शिक्षकः न, अपि तु मार्गदर्शकः, आत्मज्ञानस्य प्रकटकः च आसीत्। तस्य प्रारम्भे बाल्यकाले ग्रामस्थगुरुश्च पितामहश्च उपदेशं दत्तवन्तः, येन तस्य मनसि वेदज्ञानस्य रुचिः विकासिता। तरुणावस्थायां सः प्रतिष्ठिते गुरुकुले प्रवेशं कृत्वा, वेदवाङ्मयस्य गूढार्थं अध्ययनं कृतवान्। तत्र सः व्याकरणं, निरुक्तं, मीमांसां, न्यायशास्त्रं, दर्शनशास्त्रं च अधीतवान्। विशेषतः उपनिषदां तत्त्वार्थं सः गाढं विचिन्त्य सम्यक् अवबुध्यत। शङ्कराचार्यस्य अद्वैतवेदान्त भाष्याणि पठित्वा, आत्मस्वरूपे दृढश्रद्धां प्राप्तवान्।

गुरुपरम्परा एव तस्य जीवनस्य आधारः आसीत्। तस्य गुरुः आचर्यः वासुदेवेन्द्रसरस्वती तथा परमगुरुः आचर्यः परमशिवेन्द्र-सरस्वतिस्वामिनः आसन्। गुरोः सकाशात् सः सन्न्यासदीक्षां स्वीकृतवान्। केवलं गुरोः शिष्यः न, अपि तु स्वगुरोः आचार्यत्वं आत्मसात् कृत्वा आत्मज्ञानस्य प्रचारकः अभवत्। तस्य गुरवः तं न केवलं पठनस्य, अपि तु ध्यानस्य, योगाभ्यासस्य च अभ्यासाय प्रेरितवन्तः। तस्मात् उपनिषद्ब्रह्मेन्द्रयोगिनः ज्ञानमार्गे स्थिरं च, तपसां धृतः च आसीत्। गुरुभक्त्या सह तस्य जीवनं संयमितं, आत्मनुशासनपूर्णं च जातम्। तेन गुरुशास्त्रानुसारं प्रतिदिनं कर्म, ध्यान, अध्ययन च सम्पन्नं कृतम्। अतः गुरुपरम्परायाः संस्कारः एव तस्य अद्वैतसिद्धान्ते दृढं आधारस्थानं अभवत्। उपनिषद्ब्रह्मेन्द्र-योगिनः गुरुपरम्परायाः माध्यमेन न केवलं वैदिकविद्यां प्राप्तवान्, अपि तु जीवनव्यवहारस्य आदर्शमार्गं अपि अन्वितवान्। तस्य शिक्षाग्रहणं एव तस्य जीवनस्य सर्वोत्कृष्टं अंगम्, यः तस्य आध्यात्मिकोत्थानस्य मूलः आसीत्। अतः गुरुपरम्परा च शिक्षाग्रहणं उपनिषद्ब्रह्मेन्द्रयोगिनः जीवनस्य महत्त्वपूर्णं अध्यायम् अभवत्। तस्मात् गुरुसंपर्के तथा शिक्षायां आजपि साधकानां प्रेरणा दृश्यते।

**तपस्साधना च योगाभ्यासः -**

उपनिषद्ब्रह्मेन्द्रयोगिनः केवलं शास्त्रज्ञः न, अपि तु योगनिष्ठः महात्मा च आसीत्। बाल्ये एव सः ध्यानसाधनाय प्रवृत्तः, प्रतिदिनं निर्जने स्थले दीर्घकालम् उपविश्य योगाभ्यासं च कुर्वन् आसीत्। तस्य तपःसाधना न केवलं शरीरशुद्धिकरणाय, अपि तु चित्तशुद्धिकरणाय अपि अभवत्। सः ब्रह्मतत्त्वस्य साक्षात्काराय प्रत्यहं साधनां कुर्वन् आत्मज्ञानस्य उत्कर्षं प्राप्नोत्। उपनिषद्ब्रह्मेन्द्रयोगिनः यमः, नियमः, प्राणायामः, असनं, धारणा, ध्यानं, समाधि इत्येतेषु अष्टाङ्गयोगस्य अभ्यासं गाढतया कुर्वन् आसीत्। सः विपरीतपरिस्थितिषु अपि ध्यानसंबद्धं चित्तं संस्थाप्य, आत्मनियन्त्रणं कुर्वन् स्थितप्रज्ञः अभवत्। तस्य तपसां फलस्वरूपं चित्तं स्थिरम्, बुद्धिः निश्चलम्, आत्मसाक्षात्कारस्यानुभवः सम्यक् जातः। उपनिषद्ब्रह्मेन्द्रयोगिनः योगाभ्यासेन न केवलं आत्मविवेकं, अपि तु लोकहिताय उपयोगी नीतिविचारं च विकसति स्म। साधना एव तस्य जीवनस्य आधारः आसीत्। सः प्रतिदिनं अनुष्ठानं, प्राणायामं, ध्यानं, ध्याननिष्ठां च सम्यक् कृत्वा मोक्षमार्गे अग्रसरः अभवत्। अतः उपनिषद्ब्रह्मेन्द्रयोगिनः तपःसाधना योगाभ्यासाभ्यां आत्मशुद्धिं, ब्रह्मज्ञानं, समाधिस्थैर्यम् च प्राप्तवान्। एषा साधना एव तस्य अद्वैतवेदान्तमार्गस्य प्रबलं आधारस्थानम्।

**कृतयः -**

उपनिषद्ब्रह्मेन्द्रयोगिनः न केवलं साधकः योगनिष्ठः आसीत्, अपि तु बहुग्रन्थकारः अपि च। तेन वेदान्तसिद्धान्तं, योगमार्गं,

भक्तिसंयोगं च सुबद्धरूपेण ग्रन्थरूपेण निरूपितम्। मुख्यतः सर्वासामुपनिषदां व्यख्यानम् एतैः आचर्यैः कृतमस्ति। तस्मादेव एतेषां नाम उपनिषद्ब्रह्मेन्द्रयोगीति। तेषमन्ये मुख्यग्रन्थाः यथा –

1. उपनिषद्ब्रह्मेन्द्रविलासः – अस्मिन् ग्रन्थे योगिनः उपनिषदां तत्त्वार्थं सरलप्रकृत्या विवेच्यते। आत्मस्वरूपस्य अनुभवः, ब्रह्मैक्यं, माया, जीवब्रह्मैक्यं च सुस्पष्टरूपेण निरूपितम्।

2. ब्रह्मतत्त्वप्रकाशिका – एषः ग्रन्थः अद्वैतसिद्धान्तस्य गूढार्थं प्रकाशयति। तत्र जीव, जगत्, ब्रह्म, माया च विज्ञानसहितं विशदीकृतम्। ग्रन्थे ब्रह्मसाक्षात्कारस्य उपायाः तथा साधकजनानां मार्गदर्शनं दत्तम्।

3. योगसुधाकरः – अस्मिन ग्रन्थे योगाभ्यासस्य, ध्याननिष्ठायाः, प्राणायामस्य च नियमाः, अभ्यासकथनानि च विस्तरेण विवृताः। सः ग्रन्थः साधकानां योगमार्गे मार्गदर्शकः इव प्रसिद्धः।

4. परमशिवविलासः – एषः ग्रन्थः योगिनः भक्तिसिद्धान्तं विवेच्यते। तत्र ब्रह्मज्ञानस्य अभ्यासेन सह भक्तियोगस्य महत्वं स्पष्टं कृतम्।

एते ग्रन्थाः न केवलं शिक्षाव्यवस्थायाम् उपयोगी, अपि तु साधकस्य जीवनमार्गस्य आदर्शरूपेण दृष्टाः। ग्रन्थेषु तत्त्वज्ञानस्य स्पष्टता, साधनायाः क्रमः, ध्याननिष्ठायाः पालनं च सुस्पष्टं दृश्यते। उपनिषद्ब्रह्मेन्द्रयोगिनः ग्रन्थलेखनं केवलं शास्त्रार्थे न, अपि तु साधकजनानां आत्मबोधाय, मोक्षमार्गदर्शनाय चासीत्। एते ग्रन्थाः अद्यापि साधकाध्येतृणां हृदये दीपं प्रज्वालयन्ति।

**तत्त्वचिन्तनम् -**

उपनिषद्ब्रह्मेन्द्रयोगिनः तत्त्वचिन्तनाय गाढमनसा प्रवृत्तः आसीत्। 'सर्वं खल्विदं ब्रह्म', यत् जीवः, जगत्, चेतना, पदार्थं च सर्वं ब्रह्म एव इति सः प्रतिपादयति । तस्य चिन्तनं केवलं बौद्धिकं न, अपि तु अनुभूतिनिरपेक्षं आत्मबोधरूपं चासीत्। सः मायां, संसारबन्धनं, कर्मसंबन्धं च यथार्थदृष्ट्या विविच्य, जीवब्रह्मैक्यं साक्षात्कुर्वन् मोक्षमार्गे प्रबुद्धोऽभवत्। द्वैतज्ञानं मिथ्याज्ञानम्, आत्मज्ञामेव परमसत्यमिति उपनिषद्ब्रह्मेन्द्रयोगी स्पष्टतया प्रतिपादयति। तस्य चिन्तनपद्धतिः अत्यन्तं युक्तिपूर्णा आसीत्। सः शास्त्रग्रन्थेषु दृष्टान्तानि, सूत्राणि, भाष्यानि च उदाहरन् आत्मतत्त्वस्य गूढार्थं साधकानां हृदये प्रतिपादयति। तेन जीवब्रह्मैक्यमनुभूतम् आत्मनुभावेन ज्ञातञ्च। माया एव संसारसंबन्धेषु भ्रमरूपा, ब्रह्मसाक्षात्कारस्य मार्गे बाधकः इति चिन्त्य, तस्य समाधानमार्गे योगाभ्यास, तपःसाधना, ध्यानं च अनिवार्यं इति तस्य मतमासीत्। तस्य दृष्टिः न केवलं दार्शनिकसिद्धान्ताय, अपि तु साधकानां मोक्षमार्गदर्शनाय अपि प्रकाशकः इव कार्यं करोति। उपनिषद्ब्रह्मेन्द्रयोगी केवलं ज्ञानमार्गे न, अपि तु भक्तिमार्गे अपि प्रवृत्तः महात्मा आसीत्। आत्मबोधमार्गे योगाभ्यासेन सह भक्तिमनसः स्थापनं आवश्यकमिति तस्याभिप्रायः आसीत्। भक्तिमार्गे हृदयस्य निर्मलता, चित्तस्य स्थिरता, आत्मीयभावः च विकसितः। सः गुरुशिष्यपरम्परायाम् भक्तिसिद्धान्तस्य महत्वं प्रकटयन् उपदेशं दत्तवान्। तेन स्पष्टं प्रतिपादितम् – भक्तिमार्गस्य अभ्यासेन आत्मज्ञानस्य प्रकाशः शीघ्रं प्राप्यते। उपासकः हृदयेन श्रद्धया, निरन्तरनियमान्वितः च भक्तिसाधनां कर्तुं योग्यः।

तस्य भक्तिसिद्धान्तः न केवलं वैदिकग्रन्थेषु अपि तु योगग्रन्थेषु अपि स्पष्टतया व्यक्तः। भक्तियोगः केवलं कर्मकाण्डरूपेण न, अपि तु हृदयप्रबोधनाय, चित्तशुद्धये, आत्मसाक्षात्काराय च मार्गदर्शकः इति सः स्पष्टं वर्णयति। उपनिषद्ब्रह्मेन्द्रयोगी भक्तिमार्गं योगाभ्यासेन सह अन्वितवान्। यथा ध्यानसाधने स्थैर्यम्, प्राणायामे संयमः, तथा तपस्कर्मसु धैर्यम्, तथा भक्तिमनसि श्रद्धा च अनिवार्यं इति सः प्रतिपादितवान्। तेन भक्तिसाधनां जीवनस्य अङ्गम्, आत्मज्ञानमार्गस्य पूरकं इव प्रतिपादितम्। एवं भक्तिमार्गस्य योगिनः दृष्टिः साधकानां चित्ते न केवलं स्थैर्यं, अपि तु आत्मसाक्षात्कारस्य आलोकं प्रज्वालयति। उपनिषद्ब्रह्मेन्द्रयोगिनः जीवनं यथा ज्ञानयोग-भक्तियोग-साधनायै समन्वितम्, तथा साधकानां प्रेरणास्रोत इव भवति।

**अद्वैततत्त्वस्य प्रचारः -**

उपनिषद्ब्रह्मेन्द्रयोगी अद्वैततत्त्वस्य समर्थकः आसीत्। ब्रह्म एव सर्वत्र, जीवो ब्रह्मैक्यं प्रासुं धरापृष्ठमवततारः इति तस्य मतम्। तस्य दृष्टिः द्वैतमिथ्याज्ञानं, आत्मज्ञानं परमसत्यं च स्पष्टतया विवेचयति। सः उपनिषदां, वेदान्तग्रन्थानां, तथा स्वग्रन्थानां माध्यमेन अद्वैततत्त्वस्य प्रचारं कुर्वन् लोकानां चित्तेषु ज्ञानदीपं प्रज्वालयत्। साधकानां मार्गदर्शनाय तेन उपदेशाः, स्वग्रन्थेषु प्रदत्ताः वर्तन्ते। अद्वैततत्त्वस्य प्रचारे सः केवलं शब्दज्ञानं न, अपि तु प्रत्यक्षानुभवेन आत्मसाक्षात्कारमार्गं च सूचितवान्। तेन साधकः अनन्यभक्त्या, ध्याननिष्ठया, तपःसाधनया च ब्रह्मसाक्षात्कारं प्राप्नोतीति प्रत्यपादि।

उपनिषद्ब्रह्मेन्द्रयोगी अद्वैततत्त्वस्य प्रचारे समाजस्य आध्यात्मिक-संपन्नतां, शिक्षायाः प्रसारं च सुनिश्चितवान्। तस्य कार्ये प्रभावः दूरदर्शी, चिरकालीन च आसीत्। तेन अनेकान् शिष्यांश्च प्रशिक्षयित्वा, अद्वैततत्त्वं स्थायित्वेन सम्प्रेषितम्।

एवं अद्वैततत्त्वस्य प्रचारः उपनिषद्ब्रह्मेन्द्रयोगिनः जीवनस्य प्रधानकार्यं आसीत्। एषः प्रचारः न केवलं ज्ञानविस्ताराय, अपि तु साधकानां मोक्षमार्गदर्शनाय प्रेरणास्रोतः अपि अभवत्

**समाधिः च अन्तिमजीवनम् -**

उपनिषद्ब्रह्मेन्द्रयोगिनः अन्तिमजीवनं समाधिनिष्ठमासीत्। सः दीर्घजीवनकाले योगाभ्यासं, ध्यानं, तपःसाधनाञ्च अनवरतं कुर्वन् अन्तिमे पूर्णतया समाधौ स्थितवान्। सः शरीरसंपर्कं त्यक्त्वा आत्मस्वरूपे स्थिरः, चेतनासंपन्नः, ब्रह्मैक्यपरायणः च अभवत्। तस्य समाधिस्थितिः केवलं ध्यानस्य फलं न, अपि तु पूर्णतया आत्मबोधस्य प्रत्यक्षदर्शनरूपम् आसीत्। अन्तिमजीवने अपि सः साधकशिष्यानां मार्गदर्शकः अभवत्। तस्य अन्तिमजीवनदर्शनं उपदेशश्च शिष्यानां हृदयेषु दीर्घकालीनं प्रेरणास्रोतः इव कार्यं करोति। उपनिषद्ब्रह्मेन्द्रयोगी अन्तिमसमये ध्याननिष्ठः, संयमी, तथा नित्यज्ञानमार्गे प्रवृत्तः आसीत्।

उपनिषद्ब्रह्मेन्द्रयोगिनः जीवनस्य चरमलक्ष्यं समाधिमयमिति प्रतिपादयति। सः केवलं योगसिद्धः न, अपि तु शिष्यानां, समाजस्य, तथा भारतीयज्ञानपरम्परायाः प्रेरणास्रोतः अपि अभवत्। तस्य जीवनचर्या, समाधिस्थैर्यम्, तथा आध्यात्मिकसंपन्नता आधुनिकसाधकानां मार्गदर्शनाय अद्यापि प्रेरणास्रोतः इव दृश्यते।

**भारतीयज्ञानपरम्परायाम् योगदानम् -**

उपनिषद्ब्रह्मेन्द्रयोगी केवलं व्यक्तिगतसाधकः न, अपि तु सम्पूर्णभारतीयज्ञानपरम्परायाम् आदर्शभूतः योगी आसीत्। तेन अद्वैतवेदान्तस्य सिद्धान्तं, योगसाधनां, भक्तिसिद्धान्तं च ग्रन्थेषु प्रतिपाद्य, शिष्यपरम्परायाम् विस्तरेण तेषां तत्त्वानां प्रचारः कृतः। सः भारतीयज्ञानपरम्परायाः आध्यात्मिकमार्गस्य पुनर्निर्माणकर्ता इव अभवत्। तस्य ग्रन्थेषु केवलं तत्त्वज्ञानं न, अपि तु साधकाय व्यवहारोपयोगी मार्गदर्शनं, जीवनदृष्टिः, तथा साधनापद्धतिः अपि स्पष्टतया प्रदर्शिता। उपनिषद्ब्रह्मेन्द्रयोगी योगं, ध्यानं, तपस्साधनाञ्च भारतीयज्ञानपरम्परायाम् मूलाधारः इति प्रतिपादयामास।

एवं उपनिषद्ब्रह्मेन्द्रयोगिनः सम्पूर्णभारतीयज्ञानपरम्परायाम् दीर्घकालीनं योगदानं वरीवर्तते। तस्य जीवनदर्शनं समेषां प्रेरणास्रोत, तथा साधकजनानां मार्गदर्शकम् इव वर्तते।

**उपसंहारः -**

उपनिषद्ब्रह्मेन्द्रयोगिनः जीवनं सम्पूर्णतया योगे, तपसि, ध्याने, तथा अद्वैतवेदान्तसिद्धान्ते प्रवृत्तम् आसीत्। ज्ञानमार्गे तपः, योगाभ्यासः, भक्तिसाधना च अनिवार्या, एवं साधकः आत्मबोधमार्गे प्रगतिं प्राप्नोतीति सः प्रतिपादितवान । तस्य जीवनं आदर्शरूपेण शिष्यानां, साधकानां च प्रेरणास्रोत आदर्शभूतम् इवास्ति। उपनिषद्ब्रह्मेन्द्रयोगिनः न केवलं वैदिकज्ञानस्य प्रचारकः, अपि तु भारतीयज्ञानपरम्परायाः उज्ज्वलदीपः, सामाजिककल्याणस्य प्रवर्तकः च आसीत्। तस्य योगदानं दीर्घकालीनं, प्रभावशाली च अद्यापि साधकानां मार्गदर्शनाय प्रेरकमिव दृश्यते। एवं सम्पूर्णप्रबन्धे उपनिषद्ब्रह्मेन्द्रयोगिनः जीवनचर्या, तत्त्वज्ञान, साधनापद्धतिः, तथा भारतीयज्ञानपरम्परायाम् योगदानं सम्पूर्णतया विवेचितमिति शम्।

**सन्दर्भग्रन्थसूची –**


1. राधाकृष्णन्, सर्वपल्ली -भारतीयदर्शनम्, दिल्ली : मोतीलाल बनारसीदास।
2. दासगुप्त, सुरेन्द्रनाथ - A History of Indian Philosophy, Cambridge University Press.
3. श्रीशङ्कराचार्यः - उपनिषद्भाष्यसंग्रहः, चौखम्बा संस्कृत प्रतिष्ठानम्।
4. स्वामी गम्भीरानन्दः - Eight Upanishads with Commentary, Advaita Ashrama.
5. शर्मा, चन्द्रधर -भारतीय दर्शन की समालोचना, मोतीलाल बनारसीदास।
6. श्रीशङ्कराचार्यः - श्रीमद्भगवद्गीता (शाङ्करभष्यसहिता), गीताप्रेश, गोरखपुर।
7. श्रीशङ्कराचार्यः- ब्रह्मसूत्रशाङ्करभाष्यम्, चौखम्बा विद्याभवन, वारणासी, १९९५।
8. श्रीशङ्कराचार्यः-छान्दग्योपनिषच्छाङ्करभाष्यसहिता,गीताप्रेस – गोरखपुर – सं २०६३।
9. ईशादि नौ उपनिषत्, गीताप्रेस – गोरखपुर – सं २०६३।